# Abhilashashtakam

# અભિલાષાષ્ટકમ્

## Document Information

Text title : abhilAShAShTakam 2

File name : abhilAShAShTakam.itx

Category : aShTaka, deities_misc

Location : doc_deities_misc

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From Durlabh Stotrani. 22 verses. 8 are translated in another file

Latest update : August 22, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

# અભિલાષાષ્ટકમ્

વિશ્વાનર ઉવાચ-
એકે બ્રહ્મૈવાદ્વિતીયં સમસ્તં સત્યં સત્યં નેહ નાન્યાસ્તિ કિઞ્ચિત્ ।
એકો રુદ્રોવાદ્વિતીયોઽવતસ્થેતસ્માદેકં ત્વાં પ્રપદ્યે મહેશમ્ ॥ ૧॥

એકઃ કર્ત્તાત્વં હિ વિશ્વસ્ય શમ્ભો નાનારૂપેષ્વેકરૂપોઽસ્ય રૂપઃ ।
યદ્વત્તપત્યર્ક રૂપોઽપ્યનેકસ્તસ્માન્નાન્યં ત્વાં દિનેશં પ્રપદ્યે ॥ ૨॥

રજ્જૌ સર્પઃ શુક્તિકાયાં ચ રૌપ્યં નૈરે પુરસ્તન્મૃગાખ્યેમરીચૌ ।
યદ્વત્તદ્વદ્વિષ્વગેષ પ્રપઞ્ચૌ યસ્મિન્ જ્ઞાતે તં પ્રપદ્યે મહેશમ્ ॥ ૩॥

તોયે શૈત્યં દાહકત્વં ચ વહ્નૌ તાપો ભાનૌ શીત ભાનૌ પ્રસાદઃ ।
પુષ્પે ગન્ધૌ દુગ્ધમધ્યે ચ સર્પિર્યત્તચ્છમ્ભોત્વં તતસ્ત્વાં પ્રપદ્યે ॥ ૪॥

શબ્દં ગૃહણાસ્ય શ્રાવસ્ત્વં હિ જિઘ્રસ્ય ઘ્રાણસ્ત્વં વ્યઙ્ઘ્રિરાયાસિ દૂરાત ।
વ્યક્ષઃ પશ્યેસ્ત્વં રસજ્ઞોઽત્યજિહ્વઃ કસ્ત્વાં સમ્યગ્વેત્યતસ્ત્વાં પ્રપદ્યે ॥ ૫॥

નો વેદસ્ત્વામીશ સાક્ષાદ્ધિ વેદ નો વા વિષ્ણુનો વિધાતાખિલસ્ય ।
નો યોગીન્દ્રા નેદ્રમુખ્યાશ્ચ દેવા ભક્તો વેદ ત્વામતસ્ત્વાં પ્રપદ્યે ॥ ૬॥

નો તે ગોત્રં નાપિ જન્માપિ નાખ્યા નો વા રૂપં નૈવ શીલં ન દેશઃ ।
ઇત્થમ્ભૂતોઽપીશ્વરસ્ત્વં ત્રિલોક્યાઃ સર્વાન્કામાન્પૂરયેસ્તદ્ભજે ત્વામ્ ॥ ૭॥

ત્વત્તઃ સર્વત્વં હિ સર્વ સ્મરારેત્વં ગૌરીશસ્ત્વં ચ નગ્નોઽતિશાન્તઃ ।
ત્વં વૈ વૃદ્ધસ્ત્વં યુવા ત્વં ચ બાલસ્તત્કિં યત્ત્વં નાસ્યતસ્ત્વાં નતોઽસ્મિ ॥ ૮॥

સ્તુત્વેતિ ભૂમૌ નિપપાત વિપ્રઃ સ દણ્ડવદ્યાવદતીવ હૃષ્ટઃ ।
તાવત્સ બાલોઽખિલવૃદ્ધવૃદ્ધઃ પ્રોવાચ ભૂદેવ વરં વૃણીહિ ॥ ૯॥

તતોત્થાય હૃષ્ટાત્મા મુનિર્વિશ્વાનરઃ કૃતી ।
પ્રત્યવ્રવીત્કિમજ્ઞાતં સર્વજ્ઞસ્ય તવ પ્રભો ॥ ૧૦॥

સર્વાન્તરાત્મા ભગવાન્ શર્વઃ સર્વપ્રદો ભવાન્ ।

યાચ્ચા પ્રતિનિયુઙ્ક્તે મામયશોદૈન્ય કારિણી ॥ ૧૧॥

ઇતિ શ્રુત્વા વચસ્તસ્ય દેવા વિશ્વાનરસ્ય હ ।
શુચે શુચિ વ્રતસ્યાથશુચિઃ સ્મિત્વા બ્રવીચ્છિવઃ ॥ ૧૨॥

વાલ ઉવાચ -
ત્વયા શુચે શુચિષ્મત્યાં યોઽભિલાષઃ કૃતોહૃદિ ।
અભિરેણૈવ કાલે વત્સ ભવિષ્યત્યસંશયઃ ॥ ૧૩॥

તવ પુત્રત્વમેષ્યામિ શુચિષ્મત્યાં મહામતે ।
ખ્યાતો ગૃહપતિર્નામ્ના શુચિઃ સર્વામરપ્રિયઃ ॥ ૧૪॥

અભિલાષાષ્ટકં પુણ્યં સ્તોત્રમેતત્વયેરિતમ્ ।
અબ્દં ત્રિકાલ પઠનાત્કામદં શિવ સન્નિધૌ ॥ ૧૫॥

એતત્સ્તોત્રસ્ય પાઠં તુ પુત્ર પૌત્ર ધનપ્રદમ્ ।
સર્વ શાન્તિ કરં વાપિ સર્વાપત્યરિનાશનમ્ ॥ ૧૬॥

સ્વર્ગાપવર્ગ સમ્પત્તિકારકં નાત્ર સંશયઃ ।
પ્રાતરુત્થાય સુસ્નાનો લિઙ્ગમભ્યર્ચ્ય શામ્ભવમ્ ॥ ૧૭॥

વર્ષ જપન્નિદં સ્તોત્રમપુત્રઃ પુત્રવાન્ભવેત્ ।
વૈશાખે કાર્ત્તિકે માઘે વિશેષ નિયમૈર્યુતઃ ॥ ૧૮॥

યઃ પઠેત્સ્નાન સમયે લભતે સકલં ફલમ્ ।
કાર્ત્તિકસ્ય તુ માસસ્ય પ્રસાદાદહમવ્યયઃ ॥ ૧૯॥

તવ પુત્રત્વમેષ્યામિ યસ્ત્વન્યસ્ત્પઠિષ્યતિ ।
અભિલાષ્ટકમિદં ન દેયં યસ્ય કસ્ય ચિત્ ॥ ૨૦॥

ગોપનીયં પ્રયત્નેન એવં વન્ધ્યા પ્રસૂતિકૃત ।
સ્ત્રિયા વ પુરુષેણાપિ ત્રિયમાલ્લિઙ્ગ સન્નિધૌ ॥ ૨૧॥

અબ્દં જપ્તમિદં સ્તોત્રં પુત્રદં નાત્ર સંશયઃ ।
ઇત્યુક્ત્વાન્તર્દધે વાલઃ સોઽપિ વિપ્રો ગૃહં ગતઃ ॥ ૨૨॥

ઇતિ સ્કન્દપુરાણે કાશીખણ્ડે અભિલાષાષ્ટકં સ્તોત્રં સમાપ્તમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Abhilashashtakam*

pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*